जानपदी भवति, वृत्तिश्चेत्। जानपदी अन्या। स्वरे विशेषः। [1]उत्सादिपाठादञि कृते ङीपाद्युदात्तत्वं भवति। कुण्डी भवति, अमत्रं चेत्। कुण्डाऽन्या। गोणी भवति, आवपनं चेत्। गोणा अन्या। स्थली भवति, अकृत्रिमा चेत्। स्थला अन्या। भाजी भवति, श्राणा चेत्। [2]पक्वा इत्यर्थः। भाजा अन्या। नागी भवति, स्थौल्यं चेत्। नागा अन्या। [3]नागशब्दो गुणवचनः स्थौल्ये ङीषमुत्पादयति, अन्यत्र गुण एव [4]टापम्। [5]जातिवचनात्तु जातिलक्षणो ङीष् एव भवति। नागी। काली भवति, वर्णश्चेत्। काला अन्या। नीली भवति, अनाच्छादनं चेत्। नीला अन्या। न च सर्वस्मिन्ननाच्छादन इष्यते। [6]किं तर्हि? नीलादोषधौ प्राणिनि च (म.भा.२.२१६)। नीली ओषधिः। नीली गौः। नीली वडवा (म.भा.२.२१६)। सञ्ज्ञायां वा। नीली, नीला (म.भा.२.२१६)। कुशी भवति, अयोविकारश्चेत्। कुशा अन्या। कामुकी भवति, मैथुनेच्छा चेत्। कामुका अन्या। मैथुनेच्छावती भण्यते, नेच्छामात्रम्। कबरी भवति, केशवेशश्चेत्। कबरा अन्या॥

## शोणात् प्राचाम्। (४३/५०१)

शोणशब्दात् प्राचामाचार्याणां मतेन [7]स्त्रियां ङीष् प्रत्ययो भवति। शोणी, शोणा वडवा[8]॥

## वोतो गुणवचनात्। (४४/५०२)

गुणमुक्तवान् गुणवचनः। गुणवचनात् प्रातिपदिकाद् [9]उकारान्तात् स्त्रियां वा ङीष् प्रत्ययो भवति। पट्वी, पटुः। मृद्वी, मृदुः। उतः इति किम्? शुचिरियं ब्राह्मणी। गुणवचनात् इति किम्? आखुः।

[३४८] [10]वसुशब्दाद् गुणवचनाद् ङीबाद्युदात्तार्थम्। (म.भा.२.२१७)

वस्वी।

[३४९] [11]खरुसंयोगोपधात् प्रतिषेधो वक्तव्यः। (म.भा.२.२१७)

खरुरियं ब्राह्मणी। पाण्डुरियं ब्राह्मणी।

सत्त्वे निविशतेऽपैति पृथग् जातिषु दृश्यते।
आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः॥ (म.भा.२.२१७)

## बह्वादिभ्यश्च। (४५/५०३)

बहु इत्येवमादिभ्यः प्रातिपदिकेभ्यः [12]स्त्रियां वा ङीष् प्रत्ययो भवति। बह्वी, बहुः।

बहु। [13]पद्धति। [14]अङ्कति। [15]अञ्चति। अंहति। वंहति। शकटि। 'शक्तिः शस्त्रे' (ग.सू.४८)। [16]शारि। [17]वारि। [18]गति। अहि। कपि। मुनि। यष्टि। 'इतः प्राण्यङ्गात्' (ग.सू.४९)। 'कृदिकारादक्तिनः' (ग.सू.५०)। 'सर्वतोऽक्तिन्नर्थादित्येके' (ग.सू.५१)। [19]चण्ड। [20]अराल। कमल। कृपाण। विकट। विशाल। विशङ्कट। [21]भरुज। ध्वज। 'चन्द्रभागान्नद्याम्' (ग.सू.५२)। कल्याण। उदार। पुराण। अहन्। [22]बहुशब्दो गुणवचन एव। तस्येह पाठ उत्तरार्थः॥

---

1. उत्सादिषु इ. 2. पक्वेत्यर्थः नास्ति फ. 3. नागीशब्दः ह. 4. टापम् नास्ति फ, प्रयोजयति इत्यधिकम् क. 5. अगुणवचनात् तु क. ड. 6. कुत्र तर्हि इ. 7. स्त्रियां नास्ति फ. ह. 8. प्राचाम् इति किम् शोणा इत्यधिकम् ड. 9. उकारान्तात् प्रातिपदिकात् क. 10. वसुशब्दात् नास्ति ड. ह. 11. खरुसंयोगोपधप्रतिषेधः ह. 12. स्त्रियां नास्ति फ. 13. पद्धतिः पद्धती क. 14. नास्ति ड. 15. अङ्कन ड. 16. सति, शाधि क. 17. तारि ब. 18. गीति ब. 19. नास्ति फ, अङ्गुलि अंङ्गुली ड. इ. 20. मराल ब, मुराल फ. 21. भरद्वाज ब, भरुग क, भाव ड. भज इ. 22. बहुशब्दस्य गुणत्वात् पूर्वेणैव सिद्धे इह क. ड.